निष्ठ्यूतवान्तरुधिरविण्मूत्रस्नानोदकानि वा। न वत्सतन्त्रीं लङ्घयेत्। प्रवर्षति न धावन्, न वृथा नदीं तरेत्। न देवताभ्यः पितृभ्यश्च कामं प्रदाय, न बाहुभ्याम्, न भिन्नया नावा। न कच्छमधितिष्ठेत्। न कूपमवलोकयेत्, न लङ्घयेत्। वृद्धभारिन्टपस्नातस्त्रीरोगिवरचक्रिणाम् पन्थादेयो न्टपस्तेषां मान्यः स्नातश्च भूपतेरिति"। "सन्तानकतरुच्छायासुप्तविद्याधराध्वगमिति" कुमा०। सूर्य्ये, उष्ट्रे, च। पथिगामुकमात्रे त्रि०। गङ्गायां स्त्री अश्वतरे पु०।

**अध्वगत्** त्रि० अध्वानं गच्छति क्विप्। पथिके।

**अध्वगभोग्य** पु० अध्वगेन अतिसौलभ्यात् अयत्नलभ्यफलत्वाच्च भोग्यः ३त०। (आमड़ा) इति प्रसिद्धे आम्रातकवृक्षे। अनायासेन तत्फलस्य भोग्यत्वात्तस्य तथात्वम्।

**अध्वजा** स्त्री अध्वनि जायते जन—ड ७त०। (सोना) इति ख्याते स्वर्णपुष्पीवृक्षे।

**अध्वन्** पु० अत्ति बलम् अद—क्वनिप् धादेशः। पथि, "अपि लङ्घितमध्वानं बुबुधे न बुधोपमः" इति रघुः। अध्वानमध्वान्तविकारलङ्घ्य" इति कु०।"नैकोऽध्वानं गच्छेदिति विष्णु स०। आकाशे पु० निरुक्तकारः। अधिकदुरारोहणे च। सर्वभक्षकत्वात् काले, हिंस्रे च। अद्यते खण्डशो भक्ष्यतेऽनेनेति करणे क्वनिप्। अवयवे। प्रा०स०। उपसर्गपूर्वादच्समा०। व्यध्वःदुरध्वः (कुपथः) प्रा०ब०। कदादेशः कदध्व। अवयवश्च वेदस्य शाखाऽपि यथा "एवंविशत्यध्वयुक्तास्त्वृग्वेदमृषयो विदुः। सहस्राध्वा सामवेदो यजुरेकशताध्वकमिति।

**अध्वनीन** त्रि० अध्वानमलं गच्छति अध्वन्+ख। पथिके। पथिगमनक्षमे।

**अध्वन्य** त्रि० अध्वानमलं गच्छति अध्वन्+यत्। पथिके। पथि क्षिप्रगमनक्षमे शीघ्रगामिनि। "क्षिप्रं ततोऽध्वन्यतुरङ्गयायीति" भट्टिः।

**अध्वपति** त्रि०७त०। मार्गपालके। सूर्य्ये पु० दिवैव पथिकानां गमनात् रात्रौ च "न रात्राविति" विष्णुना गमन निषेधात् सूर्य्यस्य तत्पालकत्वम् "अध्वनामध्वपते! प्रसातिर स्वस्ति मेऽस्मिन् देवयाने पथीति यजु०।"अध्वपते! मार्गपालकरवे" इति वेददीपः।

**अध्वर** पु० अध्वानं सत्पथं राति रा+क। यज्ञे। "अध्वरेष्विष्टिनां पातेति" भट्टिः। "तमध्वरे विश्वजिति क्षितीशमिति" रघुः। आकाशे निरुक्तकारः। अष्टवसुमध्ये द्वितीयवसौ च। न ध्वरति कुटिला न भवति ध्वृ—अच् न०त०। अकुटिले च। दैव्या होतारा ऊर्द्धमध्वरं न इति २७,१८ "इमं यज्ञमवतामध्वरं न" इति यजु०। २७,१७ अध्वरं "अकुटिलं शास्त्रोक्तमिति" वेददीपः। सावधाने त्रि० नडा० फक्। आध्वरायणः।

**अध्वरकर्म्मन्** न० अध्वरएव कर्म्म। यज्ञरूपकर्मणि।

**अध्वरमीमांसा** स्त्री अध्वरस्य यज्ञस्य कर्त्तव्यताज्ञानाय मीमांसा विचारः। जैमिनीयप्रोक्ते "अथातो धर्मजिज्ञासेत्यादि धर्ममीमांसाख्ये शास्त्रे।

**अध्वरथ** पु० अध्वैव रथो यस्य ब०। पथिप्रज्ञे दूते। अध्वने हितः पर्य्याप्तो रथो यस्य ब०। पथिगमनोपयुक्ते रथे। चक्रविशिष्टोरथस्तावत् क्रीडार्थः, देवयानार्थः विनयार्थः पथिगमनार्थः गन्त्रीरथश्चेति भेदात् पञ्चविधः। इति हेमचन्द्रः।

**अध्वर्य्यु** पु० अध्वरमिच्छति अध्वर+क्यच्—युच् ततोऽन्त्याकारलोपः। यजुर्वेदज्ञे होमकारिणि ऋत्विजि। "निर्मिमीते क्रियासङ्कैरध्वर्य्युर्यज्ञियं वपुरिति सा०भा०। सोमयागे षोड़शसु ऋत्विक्षु चतुर्षु प्रधानेषु मध्ये ऋत्विग्भेदे तद्विवरणम् अच्छावाकशब्दे दृश्यम्। "होता प्रथमं शंसति तमध्वर्य्युः प्रोत्साहयतीति" सि०कौ०। "त्वमध्वर्य्युरुत होतासि पूर्व्वाः प्रशास्तापोता जनुषा पुरोहित" इति ऋ० १,९४,६। योपधत्वात् स्त्रियां न ङीप्। अध्वर्य्योर्भावः कर्म उद्गा० अण् आध्वर्य्यवम् तद्भावादौ न०।

**अध्वशल्य** पु० अध्वनि शल्यमिवाचरतीति क्विप्+अच्। पथिकानां पादवस्त्रादौ शल्यवद्वेधकारके (आपाङ्) इति ख्याते अपामार्गवृक्षे।

**अध्वस्मन्** त्रि० ध्वन्स—मनिन् किच्च न०त०। ध्वंसरहिते "अध्वस्मभिः पथिभिः भ्राजदृष्ट्य" इति ऋ० २,२४,५, अध्वस्मभिः ध्वंसरहितैरिति भा० अध्वस्मानोदिविश्रितेति ऋ०१,३०४०।

**अध्वाति** पु० अध्वानमतति अत इ ६त०। पथिके। अद्धा निश्चयमतति अद्धेति दोषदो धान्तः। मेधाविनि निरुक्त०।

**अध्वान्तशात्रव** पु० अध्वान्तस्य मार्गसीमायाः शात्रव इव। सोनाकवृक्षे। ६त०। मार्गसीमारिपौ पु०।

**अध्वायन** न० अध्वनि अयनं गतिः। यात्रायाम् "अध्यायन्... अहचारकर्म्म सौरेण मानेन सदाध्यवस्ये"दिति विष्णुध० पुरा०। "अध्वायनमध्वगमनं यात्रेति यावदिति" रघु०।